# Narayanopanishat or NarAyana Atharvashirsha

# નારાયણોપનિષત્ અથવા નારાયણ અથર્વશીર્ષ

## Document Information

Text title : nArAyaNopaniShat evaM nArAyaNa atharvashIrSha

File name : nArAyaNopaniShat.itx

Category : atharvashIrSha, upanishhat, narayana, svara

Location : doc_upanishhat

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, Gaura Nitai Dasa

Latest update : October 21, 2013, May 14, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 14, 2022

*sanskritdocuments.org*

# નારાયણોપનિષત્ અથવા નારાયણ અથર્વશીર્ષ

કૃષ્ણયજુર્વેદીયા

ૐ સહ નાવવતુ સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ । મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

(પ્રથમઃ ખણ્ડઃ
નારાયણાત્ સર્વચેતનાચેતનજન્મ)

ૐ અથ પુરુષો હ વૈ નારાયણોઽકામયત પ્રજાઃ સૃજેયેતિ ।
નારાયણાત્પ્રાણો જાયતે । મનઃ સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુર્જ્યોતિરાપઃ પૃથિવી વિશ્વસ્ય ધારિણી ।
નારાયણાદ્ બ્રહ્મા જાયતે । નારાયણાદ્ રુદ્રો જાયતે ।
નારાયણાદિન્દ્રો જાયતે । નારાયણાત્પ્રજાપતયઃ પ્રજાયન્તે ।
નારાયણાદ્દ્વાદશાદિત્યા રુદ્રા વસવઃ સર્વાણિ ચ છન્દાꣳસિ ।
નારાયણાદેવ સમુત્પદ્યન્તે । નારાયણે પ્રવર્તન્તે । નારાયણે પ્રલીયન્તે ॥

(એતદૃગ્વેદશિરોઽધીતે ।)

(દ્વિતીયઃ ખણ્ડઃ
નારાયણસ્ય સર્વાત્મત્વમ્)

ૐ । અથ નિત્યો નારાયણઃ । બ્રહ્મા નારાયણઃ । શિવશ્ચ નારાયણઃ ।
શક્રશ્ચ નારાયણઃ । દ્યાવાપૃથિવ્યૌ ચ નારાયણઃ ।
કાલશ્ચર્ન્ ષન્સ્ક્રિત્! ળોવે ષન્સ્ક્રિત્!! િળવે ષન્સ્ક્રિત્!!!
હ્ત્ત્પ્://વ્વ્।સન્સ્ક્રિત્દોચુમેન્ત્સ્।ઓર્ગ્ નારાયણઃ । દિશશ્ચ નારાયણઃ । ઊર્ધ્વશ્ચ નારાયણઃ ।
અધશ્ચ નારાયણઃ । અન્તર્બહિશ્ચ નારાયણઃ । નારાયણ એવેદꣳ સર્વમ્ ।
યદ્ભૂતં યચ્ચ ભવ્યમ્ । નિષ્કલો નિરઞ્જનો નિર્વિકલ્પો નિરાખ્યાતઃ
શુદ્ધો દેવ એકો નારાયણઃ । ન દ્વિતીયોઽસ્તિ કશ્ચિત્ । ય એવં વેદ ।

સ વિષ્ણુરેવ ભવતિ સ વિષ્ણુરેવ ભવતિ ॥
(એતદ્યજુર્વેદશિરોઽધીતે ।)

(તૃતીયઃ ખણ્ડઃ
નારાયણાષ્ટાક્ષરમન્ત્રઃ)

ઓમિત્યગ્રે વ્યાહરેત્ । નમ ઇતિ પશ્ચાત્ । નારાયણાયેત્યુપરિષ્ટાત્ ।
ઓમિત્યેકાક્ષરમ્ । નમ ઇતિ દ્વે અક્ષરે । નારાયણાયેતિ પઞ્ચાક્ષરાણિ ।
એતદ્વૈ નારાયણસ્યાષ્ટાક્ષરં પદમ્ ।
યો હ વૈ નારાયણસ્યાષ્ટાક્ષરં પદમધ્યેતિ । અનપબ્રુવસ્સર્વમાયુરેતિ ।
વિન્દતે પ્રાજાપત્યꣳ રાયસ્પોષં ગૌપત્યમ્ ।
તતોઽમૃતત્વમશ્નુતે તતોઽમૃતત્વમશ્નુત ઇતિ । ય એવં વેદ ॥

(એતત્સામવેદશિરોઽધીતે । ઓં નમો નારાયણાય)

(ચતુર્થઃ ખણ્ડઃ
નારાયણપ્રણવઃ)

પ્રત્યગાનન્દં બ્રહ્મપુરુષં પ્રણવસ્વરૂપમ્ । અકાર ઉકાર મકાર ઇતિ ।
તાનેકધા સમભરત્તદેતદોમિતિ ।
યમુક્ત્વા મુચ્યતે યોગી જન્મસંસારબન્ધનાત્ ।
ૐ નમો નારાયણાયેતિ મન્ત્રોપાસકઃ । વૈકુણ્ઠભુવનલોકં ગમિષ્યતિ ।
તદિદં પરં પુણ્ડરીકં વિજ્ઞાનઘનમ્ । તસ્માત્તટિદાભમાત્રમ્ ।
( bhAshya તસ્માત્ તટિદિવ પ્રકાશમાત્રમ્)
બ્રહ્મણ્યો દેવકીપુત્રો બ્રહ્મણ્યો મધુસૂદનઃ । var બ્રહ્મણ્યો મધુસૂદનઓમ્
બ્રહ્મણ્યઃ પુણ્ડરીકાક્ષો બ્રહ્મણ્યો વિષ્ણુરચ્યુત ઇતિ ।
સર્વભૂતસ્થમેકં નારાયણમ્ । કારણરૂપમકાર પરં બ્રહ્મ ૐ ।
એતદથર્વશિરોયોઽધીતે ॥

વિદ્યાઽધ્યયનફલમ્ ।

પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ ।
સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ ।
તત્સાયંપ્રાતરધીયાનોઽપાપો ભવતિ ।
માધ્યન્દિનમાદિત્યાભિમુખોઽધીયાનઃ (મધ્યન્દિન)
પઞ્ચમહાપાતકોપપાતકાત્ પ્રમુચ્યતે ।
સર્વ વેદ પારાયણ પુણ્યં લભતે ।

નારાયણસાયુજ્યમવાપ્નોતિ નારાયણ સાયુજ્યમવાપ્નોતિ ।
ય એવં વેદ । ઇત્યુપનિષત્ ॥

ૐ સહ નાવવતુ સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ । મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

શાન્તાકારં ભુજગશયનં પદ્મનાભં સુરેશં
વિશ્વાધારં ગગનસદૃશં મેઘવર્ણં શુભાઙ્ગમ્ ।
લક્ષ્મીકાન્તં કમલનયનં યોગિભિર્ધ્યાનગમ્યં
વન્દે વિષ્ણું ભવભયહરં સર્વલોકૈકનાથમ્ ॥

This is more appropriately titled nArAyaNAtharvashira upaniShad.
Although titled as mahAnArAyaNopaniShat, it is different from
the long version with 25 khaNDas from atharvaveda.
Encoded and proofread by Sunder Hattangadi

*Narayanopanishat or NarAyana Atharvashirsha*
pdf was typeset on May 14, 2022

Please send corrections to *sanskrit@cheerful.com*